# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ७ | गुणाः - ७० |
| विषयः - वास्तुशास्त्रम् | (C.E.- 1.1.1. New ) | |
| दिनाङ्कः - २१/१२/२०१८ | *ग्रन्थः - वास्तुमाणिक्यरत्नाकरः मुहूर्तचिन्तामणिः* | समयः -२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

*(१) गृहस्यैव सम्पूर्णकार्येऽपि द्यूते पुंनर्भूविवाहे च वर्गस्य शुद्धौ ।*
*तथा काकिणीवादयोर्वैविचारे नरस्यैव नाम्नः प्रकुर्यात् विधिज्ञः ॥*

*(२) दशांशकान् शिरोभागे पुच्छे सप्तदशांशकान् ।*
*त्यजेद्दुर्द्रं शिरोभागात् पुच्छे दष्टादशं शुभम् ॥*

*(३) निवासे नूतने ग्रामे वा कोशस्य विवृद्धये ।*
*कुर्य्याद् विचारं काकिण्या दशाप्राग्नगरे शुभा ॥*

**प्रश्नः २ एकस्यनिबन्धात्मकं वर्णनं कुरुत ।** **( १० )**

*(१) ग्रामवासविचारः ।*

*(२) भूमिपरिक्षा ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** **( १० )**

*(१) रोहिण्यां त्र्युत्तरे पुण्ये मृगे मैत्रे करत्रये ।*
*वसुद्वये हि रेवत्यां गृहारम्भः सुखप्रदः ॥*

*(२) तपस्ये तपे मार्गे शीर्षेऽपि ज्येष्ठे ।*
*तथा कार्तिके माधवे पुण्यमासे ॥*

*(३) क्षिप्रे ध्रुवे च नक्षत्रे शुभयोगे शुभे तिथौ ।*
*शुभवारेऽचरे लग्ने नद्वारस्थापनं शुभम् ॥*

**प्रश्नः ४ कस्याप्येकस्योत्तरं सविस्तरं वर्णयत ।** **( १० )**

*(१) अश्वगृहनिर्माणम् ।*

*(२) गृहप्रवेशविचारः ।*

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेषु द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

*(१) गृहेशतत्स्त्रीसुखवित्तनाशोऽर्केन्द्वीज्यशुक्रे बिबलेऽस्तनीचे ।*
*कर्त्तुः स्थितिर्नो विधुवास्तुनोर्भे पुरः स्थिते पृष्ठगते खनिः स्यात् ॥*

*(२) तिथ्यर्काष्टाष्टिगोरुद्रशक्रे नामाक्षरं त्रयम् ।*
*भूद्वयब्धीष्वङ्गदिग्वह्निविश्वेषु द्वौ नगेऽब्धयः ॥*

*(३) देवालये गेहविधौ जलाशये राहोर्मुखं शम्भुदिशो विलोमतः ।*
*मीनार्कसिंहार्कमृगार्कतस्त्रिभे खाते मुखात् पृष्ठविदिक्छुभा भवेत् ॥*

**प्रश्नः ६ कस्याप्येकस्योत्तरं सविस्तरेण ददत ।** **( १० )**

*(१) ग्रामनिवासे निषिद्धस्थानानि ।*

*(२) गृहारम्भे वृषवास्तुचक्रं निरुपयत ।*

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितेषु दशप्रश्नानामुत्तरं यच्छत ।** **( १० )**

*(१) वास्तुमाणिक्यरत्नाकरस्य लेखकः कः ?*

*(२) कुशयुक्ताः भूमिः कस्य वर्णस्य कल्याणकारिः भवति ?*

*(३) अवर्गस्य स्वामि कः ?*

*(४) मूषकस्य शत्रुः कः ?*

*(५) गृगस्य मित्रः कः ?*

*(६) आश्विनमासे सिंहे सूर्यः भवति तदा गृहारम्भे कस्य हानिः भवति?*

*(७) अश्वगृहः कस्मिन् दिशि शुभः ?*

*(८) मार्गशीर्षे कूपारम्भः भवति वा न वा ?*

*(९) इष्टिकायाः कति प्रकाराः सन्ति ?*

*(१०) गृहाणां कति नामानि ?*

*(११) सूतिकागृहं कस्मिन् दिशि कार्या ?*

*(१२) मुहूर्तचिन्तामणिग्रन्थस्य लेखकः कः ?*

*(१३) शयनकक्षः कस्मिन् दिशि भवति ?*

*(१४) अन्नागारः कुत्र भवति ?*

*(१५) गृहे औषधालयः कुत्र भवति ?*

--००--